श्री सुब्रह्मण्य मूलमंत्र स्तवः

श्री सुब्रह्मण्य मूलमंत्र स्तवः

अथातः संप्रवक्ष्यामि मूलमंत्रस्तवं शिवं |
जपतां शृण्वतां नृणां भुक्तिमुक्तिप्रदायकं || 1 ||

सर्वशत्रुक्षयकरं सर्वरोगनिवारणं |
अष्टैश्वर्यप्रदं नित्यं सर्वलोकैकपावनं || 2 ||

शरारण्योद्भवं स्कंदं शरणागतपालकं |
शरणं त्वां प्रपन्नस्य देहि मे विपुलां श्रियं || 3 ||

राजराजसखोद्भूतं राजीवायतलोचनं |
रतीशकोटिसौंदर्यं देहि मे विपुलां श्रियं || 4 ||

वलारिप्रमुखैर्वंद्य वल्लींद्राणीसुतापते |
वरदाश्रितलोकानां देहि मे विपुलां श्रियं || 5 ||

नारदादिमहायोगिसिद्धगंधर्वसेवितं |
नववीरैः पूजितांघ्रे देहि मे विपुलां श्रियं || 6 ||

भगवन् पार्वतीसूनो स्वामिन् भक्तार्तिभंजन |
भवत्पादाब्जयोर्भक्तिं देहि मे विपुलां श्रियं || 7 ||

वसु धान्यं यशः कीर्तिं अविच्छेदं च संततेः |
शत्रुनाशनमद्याशु देहि मे विपुलां श्रियं || 8 ||

इदं षडक्षरं स्तोत्रं सुब्रह्मण्यस्य संततं |
यः पठेत्तस्य सिद्ध्यंति संपदश्चिंतिताधिकाः || 9 ||

हृदब्जे भक्तितो नित्यं सुब्रह्मण्यं स्मरन् बुधः |
यो जपेत् प्रातरुत्थाय सर्वान्कामानवाप्नुयात् || 10 ||

इति कुमारतंत्रार्गतं श्रीसुब्रह्मण्य मूलमंत्र स्तवः |